Report Report

सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ।
वैकुण्ठनामग्रहणं अशेषाघहरं विदुः ।

h
report
78

नाममन्त्रार्थविलासम्

(विष्णुनामसहस्रम्)

मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह
स वाग्वज्रो यजमानं हिनास्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्

ORS LIMITED

बालधन्वि वेङ्कटार्य ग्रन्थमाला पुष्पम्

भट्ट पराशर भाष्यानुसारि

श्री विष्णुसहस्रनाम स्तोत्रम्

(अनुबन्ध सहितम्)

सम्पादकः

तिरुनारायणपुरं अरैयर् श्रीराम शर्मा

उभयभाषावेदान्तालंकारः

प्रकाशकः

डा. ~~सि.~~ रामप्रियंगार्यः [illegible]
चक्रवर्ती,

श्री. को. कं. वा. अ. कुमारश्रीशैलार्यस्मारकं
प्रकाशनम्
मुदलियाण्डान् स्वामि सन्निधिः मेलुकोटे,
मण्डयजिल्ला - कर्णाटकराज्यम्
पिन्.नं.

विषयसूची

viii विष्णुसहस्रनामस्तोत्रम् ।
ix श्लोकविशेषः ।
x फलश्रुतिः ।

६ अनुबन्धः ।
७ पञ्चायुधस्तोत्रम् ।
८ द्वादशनामपञ्जरम् ।
९ पाठसमापनमंगलम् ।
१० लक्ष्म्यष्टोत्तरशतनामस्तोत्रम् ।
११ विष्णुसहस्रनामावलिः ।
१२ लक्ष्म्यष्टोत्तरशतनामावलिः ।
१३ अनुबन्धः २
शाब्दनिर्वचनवार्तिकसारः ।
१४ अनुबन्धः १
सहस्रनामतत्त्वम् ।
१५ अनुबन्धः ३
सञ्ज्ञानाभिनन्दनम्

!! अनुबन्ध

1 शुक्लाम्बरधरम् ।

2 विष्णोर्नामसहस्रस्य । 3 श्री महाविष्णोः प्रीत्यर्थे कैंकर्यरूपे ।

4 विश्वाधारं गगनसदृशम्

5 योगिहृद्ध्यानगम्यम् ।

6 त्रिककुत् - धाम

7 महाद्रिधृत्

8 विश्वसृक्

9 इष्टोऽविशिष्टः

10 महर्द्धि - ऋद्धः

11 हविः - हरिः

12 विरतः - मार्गः

13 प्रणमः

14 निवृत्तात्मा

15 सत्यक्षरं - असत्क्षरम्

16 परायणः

17 अशोकः

18 शौरिः - शूरः

19 स्तुतः
20 सत्यपरायणः
21 त्रिलोकधृत्
22 वाजसनिः
23 पर्जन्यः - पावनः
24 अनन्तहुतभुग्भोक्ता
25 नैकदः
26 अद्भुतः
27 कपिरव्ययः
28 जीवनः
29 प्राणधृत्
30 कीर्तनीयस्य
31 प्रजाः
32 याति प्राधान्यम्
33 नैको प्रजायते
34 युज्यतां मा
35 सचँद्रार्कनक्षत्रम्
36 प्रथमं परिकल्पितः
37 आचारप्रभवो धर्मः

38 योगज्ञानम्
39 शिल्पानि कर्म च
40 जगतः प्रभुमव्ययम्
41 सहस्रनामतस्तुल्यम्
42 शाश्वते
43 सहस्रकोटी
44 यत्र योगेश्वरः
45 ध्रुवानीतिर्मतिर्मम।
46 सुखिनोभवन्ति
47 सर्वत्रमच्छिद्रम् 48 आपदामपहर्तारम्
49 वेदाच्छास्त्रंपरंनास्ति
50 नारायणायेतिसमर्पयामि।
51 यदक्षरपदभ्रष्टम्
52 श्रीनारदउवाच
53 मोक्षफलप्रदम्
54 हरिहरब्रह्मादिभिः
55 पंकजशंखमुख्यनिधिभिः।

56 55 युक्तां सदा लक्ष्मभि:
57 56 लक्ष्मि प्रसीद
58 57 गंधमाल्य शुभे
59 58 त्रिभुवनतापहरे
60 59 कामां क्षीरोदसंभवाम्
61 60 मंगलां देवीम्
62 61 वनदुर्गाम्
63 62 ब्रह्मविष्णुशिवात्मिकाम्
64 63 इति श्रीपांचरात्रे

(1.) अनुबन्धः

1 मन्त्रो सिद्धान्तमार्गः

2 प्रधानार्थविनिर्णयः

3 ब्रह्मलक्षणनिर्देशः

4 प्रतिपादन प्रक्रिया

5 शतकाद्यान्त्य नामानि

6 प्रधानार्थोपबृंहणम्

7 उक्तार्थसंग्रहः

8 पंचसिद्धान्तनिर्णयः

9 साँख्यं च योगजं तत्त्वम्

10 षाड्गुण्यागमसंभवम्

~~विज्ञापनम्~~ उपोद्घातः

नवप्रकाशनकारणम्

भगवन्नामसहस्रं हि पाठान्तरसहस्रैः अद्य प्रकीर्णप्रायं दृश्यते। संघशः संकीर्तनावसरेषु अपपाठाः सोढुं अशक्याः भवन्ति। महर्षिपरम्पराप्राप्तानां आचार्योपदिष्टानां अर्थानां च विस्मारकाः भवन्ति। अतः समीचीनपाठप्रचारार्थं एवायमस्माकं प्रयत्नः।

प्रकाशनोद्यमः

अत्र महाविष्णोः पञ्चसिद्धान्तनिष्ठानिर्णयं, भट्टपराशरभाष्यं, वरदार्यनिर्वचनभाष्यं, वार्तिकं चानुसृत्य पाठप्रतिष्ठा सम्पादिता। एवं आचार्यैरनुसन्धीयमानाः अनुबन्धश्लोका यद्यो ऽपि तथैव स्थापिताः। तथा महालक्ष्म्याः अष्टोत्तरशतनामस्तोत्रस्य पुराणान्तरगतं पार्वतीश्वरसंवादरूपं पाठमपहाय पाञ्चरात्रान्तर्गतो भृगुसनत्कुमारसंवादरूपः पाठ एव साम्प्रदायिको विष्णुसहस्रनामानुगुणः प्रकाशितः।

मुद्रणप्रकारविशेषः

किञ्च संहितासन्धिनियमसंभवान्येव नाम्नां रूपाणि पृथक् पृथक् अत्र निवेशितानि। यथा :- "विष्णुर् ,वषट्कारो" इत्यादि। क्वचित् कंसरेखान्तः सन्धिरहितानि रूपाणि पदपाठज्ञानार्थं निवेशितानि। यथा:- (भूतकृत् + भावो) इत्यादि। प्रायः विसर्गसन्धिरेव अत्र प्राचुर्येण दृश्यते। विसर्गस्य च विकाराः अष्टौ :- ओ, श्, ष्, स्, र्, जिह्वामूलीयः, उपध्मा-

ओय:, लोप:, इति। जीह्वामूलीयस्य "ᳵ" इत्येव चिह्नम्। उपध्मानीयस्य "ᳶ" एवं चिह्नम्। लोपप्रसंगे च कसरेखायां (ः) एत: विसर्गः स्थाप्यते। अनेकपदघटितस्य नाम्नः एकत्वज्ञानार्थं उपरि अवधिचिह्नं स्थापितम्। यथा:- "मुक्तानां परमा गतिः" "शत्रुजिच्छत्रुतापनः" इत्यादि। मूलबाह्याः श्लोकाः बाहुरेखान्तः [ ] स्थापिताः। एवं पाठज्ञानसौकर्याय अयं विषयः प्रथमं अवश्यं अवेक्षणीयः।

पठनयोग्यता

मन्त्रकल्पानुसारिणां त्रैवर्णिकानां मन्त्रविशेषरूपेण सहस्रनामाध्याये यथाधिकारः तथा स्तोत्रविशेषरूपेण सर्वेषां जीवानां अस्त्यधिकारः इति सर्वेषां पूर्वाचार्याणां अभिप्रायः। सर्वेषामेव भावशुद्धिः अधिकारप्रापिका, न क्रियाकारकादिपरिपाटी। गरीयसोऽपि भगवत्प्रसाद एव फलहेतुः, लघीयसि किं दण्डवारितः! इति भट्टपादा आहुः।

तथापि आचार्यमुखेन उपदेशं प्राप्यैव अस्य पाठादिकं कर्तव्यं, नान्यथा। गुरुभक्तिरत्यन्तं आवश्यकी। वैष्णवदीक्षा च, इति शंकरभगवत्पादा अप्याहुः।

इत्येवमर्थजातं

। मध्ये च्छेद शंकाहस्य-

सम्प्रदायः

सहस्रनाम्नां शब्दः क्रमविशेषः महाभारतमुखेन व्यासरूपिणा नारायणेन उपदिष्टः। अर्थः तत्त्वविशेषस्तु स्वयं विष्वक्सेनादिभ्यः पाञ्चरात्रसिद्धान्तमुखेन उपदिष्टः। विष्वक्सेन परम्परया - भगवद्रामानुजमुनेः अनुग्रहेण भट्ट पराशर गुरुः भगवद्गुणदर्पणं भाष्यं उपकृत्य शब्दार्थोभय सम्प्रदायमप्यरक्षत्॥ एवमसौ साम्प्रदायिकः पन्थाः॥

अनुबन्धाः.

सहस्रनामाध्यायादयस्तु भारतादिषु यावत्पठिताः तेषां पूर्वापरानुबन्धतया शौनकादिभिः पूर्वाचार्यैश्च सर्वशाखाप्रत्ययन्यायं, शेषपूरणे परबृंहणादिन्यायं च अनुसृत्य श्लोकान्तराणि प्रकरणान्तराणि च अनुसंहितानि। अत्र तान्यपि नैव स्वीकृतानि पाठशोधनार्थं अनुसृतानि प्रमाणानि प्रथमद्वितीयानुबन्धयोः दर्शितानि। एवं अत्र पञ्चसिद्धान्तनिष्ठनिर्णयः ज्ञातो भवति। किञ्च नामावलीमन्त्ररूपेण नाम्नां प्रयोगश्च विज्ञातो भवति। व्यास-पराशरादि सम्प्रदायश्च सुरक्षितो भवति।

सहस्रनामप्राशस्त्यम्

१ महाभारतसारत्वात्

२ ऋषिभिः परिगानतः।

३ वेदाचार्यसमाहारात्

४ भीष्मोत्कृष्टमतत्वतः॥१॥

५ परिग्रहातिशयतः

६ गीताद्यैकार्थ्यतश्च नः।

सहस्रनाम्नामध्यायः उपादेयतमो मतः॥२॥

इति भट्टपराशरस्य

गेयं गीता नामसहस्रं ध्येयं श्रीपतिरूपमजस्रम्

शङ्करभगवत्पादस्य

श्री विष्णुसहस्रनाम स्तोत्रम्

(सानुबन्धम्)

~~(प्रारम्भमंगलम्)~~ १

श्री महाभारते

विष्णुसहस्रनामस्तोत्राध्यायः

(सानुबन्धः)

॥ श्रीमहाभारते

॥ श्रीविष्णुसहस्रनामस्तोत्रम् ॥

(पाठारम्भमंगलम्)

॥ हरिः ॐ ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥

अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥

ॐ नमो विष्णवे प्रभविष्णवे ॥

श्रीमहाभारते
विष्णुसहस्रनामस्तोत्राध्यायः
१ (सहस्रनामभूमिका)

श्रीवैशम्पायन उवाच—

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥ १ ॥

युधिष्ठिर उवाच—

किमेकं दैवतं लोके किं वाऽप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ॥ २ ॥

को धर्मः सर्वधर्माणां भवतः परमो मतः ।
किं जपन् मुच्यते जन्तुर्जन्मसंसारबन्धनात् ॥ ३ ॥

श्रीभीष्म उवाच—

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण पुरुषस्सततोत्थितः ॥ ४ ॥

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायन् स्तुवन् नमस्यंश्च यजमानस्तमेव च ॥ ५ ॥

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥ ६ ॥

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥ ७ ॥

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरस्सदा ॥ ८ ॥

परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ॥ ९ ॥

पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ।
दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥ १० ॥

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥ ११ ॥

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ॥ १२ ॥

यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥ १३ ॥

विष्णोर्नामसहस्रस्य वेदव्यासो महानृषिः ।
छन्दोऽनुष्टुप् तथा देवो भगवान् देवकीसुतः ॥ १४ ॥

अमृतांशूद्भवो बीजं शक्तिर्देवकिनन्दनः ।
त्रिसामा हृदयं तस्य शान्त्यर्थे विनियुज्यते ॥ १५ ॥

विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम् ।
अनेकरूपदैत्यान्तं नमामि पुरुषोत्तमम् ॥ १६ ॥

ॐ अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामन्त्रस्य । श्रीवेदव्यासो
भगवान् ऋषिः । अनुष्टुप् छन्दः । श्रीमहाविष्णुः परमात्मा
श्रीमन्नारायणो देवता । अमृतांशूद्भवो भानुरिति बीजम् । देवकी-
नन्दनः स्रष्टेति शक्तिः । उद्भवः क्षोभणो देव इति परमो मन्त्रः ।
शङ्खभृन्नन्दकी चक्रीति कीलकम् । शार्ङ्गधन्वा गदाधर इत्यस्त्रम् ।
रथाङ्गपाणिरक्षोभ्य इति नेत्रम् । त्रिसामा सामगस्सामेति
कवचम् । आनन्दं परब्रह्मेति योनिः । ऋतुस्सुदर्शनः काल
इति दिग्बन्धः । श्रीविश्वरूप इति ध्यानम् ॥ श्रीमहाविष्णु-
प्रीत्यर्थे कैङ्कर्यरूपे श्रीसहस्रनामजपे विनियोगः ॥

(ध्यानम्)

क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकते मौक्तिकानां
मालाक्लृप्तासनस्थः स्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः ।
शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपीयूषवर्षैः
आनन्दी नः पुनीयादरिनलिनगदाशङ्खपाणिर्मुकुन्दः ॥ १ ॥

भूः पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्रसूर्यौ च नेत्रे
कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः ।
अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यैः
चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि ॥ २ ॥

(ध्यानान्तरम्)

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ १॥

मेघश्यामं पीतकौशेयवासं
श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम् ।
पुण्योपेतं पुण्डरीकायताक्षं
विष्णुं वन्दे सर्वलोकैकनाथम् ॥

सशङ्खचक्रं सकिरीटकुण्डलं
सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षस्स्थलशोभिकौस्तुभं
नमामि विष्णुं शिरसा चतुर्भुजम् ॥ २॥

छायायां पारिजातस्य हेमसिंहासनोपरि ।
आसीनमम्बुदश्याममायताक्षमलंकृतम् ॥
चन्द्राननं चतुर्बाहुं श्रीवत्सांकितवक्षसम् ।
रुक्मिणीसत्यभामाभ्यां सहितं कृष्णमाश्रये ॥

-:***:-

॥ श्रीविष्णुसहस्रनामस्तोत्रम् ॥

॥ ॐ ॥

१ ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥ १ ॥

२ पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ २ ॥

३ योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥ ३ ॥

४ सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥ ४ ॥

५ स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ ५ ॥

६ अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ ६ ॥

७ अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ॥ ७ ॥

८ ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ ८ ॥

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ ९ ॥

सुरेशश्शरणं शर्म विश्वरेताः प्रजाभवः ।
अहस्संवत्सरो व्यालः प्रत्ययस्सर्वदर्शनः ॥ १० ॥

अजस्सर्वेश्वरस्सिद्धः सिद्धिस्सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा सर्वयोगविनिस्सृतः ॥ ११ ॥

वसुर्वसुमनास्सत्यः समात्मा सम्मितस्समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥ १२ ॥

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिश्शुचिश्रवाः ।
अमृतश्शाश्वतस्थाणुर्वरारोहो महातपाः ॥ १३ ॥

सर्वगस्सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ॥ १४ ॥

लोकाध्यक्षस्सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ १५ ॥

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ १६ ॥

युगादिकृद्युगावर्तो नैकमायो महाशनः ।
अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित् ॥ ३३ ॥

इष्टोऽविशिष्टश्शिष्टेष्टः शिखण्डी नहुषो वृषः ।
क्रोधहा क्रोधकृत् कर्ता विश्वबाहुर्महीधरः ॥ ३४ ॥

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपांनिधिरधिष्ठानम् अप्रमत्तः प्रतिष्ठितः ॥ ३५ ॥

स्कन्दस्स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥ ३६ ॥

अशोकस्तारणस्तारश्शूरश्शौरिर्जनेश्वरः ।
अनुकूलश्शतावर्तः पद्मी पद्मनिभेक्षणः ॥ ३७ ॥

पद्मनाभोऽरविन्दाक्षः पद्मगर्भश्शरीरभृत् ।
महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥ ३८ ॥

अतुलश्शरभो भीमस्समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः ॥ ३९ ॥

विक्षरो रोहितो मार्गो हेतुर्दामोदरस्सहः ।
महीधरो महाभागो वेगवानमिताशनः ॥ ४० ॥

उद्भवः क्षोभणो देवश्श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ॥ ४१ ॥

व्यवसायो व्यवस्थानस्संस्थानस्स्थानदो ध्रुवः ।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टश्शुभेक्षणः ॥ ४२ ॥

रामो विरामो विरतो मार्गो नेयो नयोऽनयः ।
वीरश्शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥ ४३ ॥

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणमः पृथुः ।
हिरण्यगर्भश्शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥ ४४ ॥

ऋतुस्सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रस्संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥ ४५ ॥

विस्तारस्स्थावरस्थाणुः प्रमाणं बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥ ४६ ॥

अनिर्विण्णस्स्थविष्ठोऽभूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामस्समीहनः ॥ ४७ ॥

यज्ञ इज्यो महेज्यश्च ऋतुस्सत्रं सतां गतिः ।
सर्वदर्शी निवृत्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥ ४८ ॥

सुव्रतस्सुमुखस्सूक्ष्मस्सुघोषस्सुखदस्सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥ ४९ ॥

स्वापनस्स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ ५० ॥

धर्मगुब्धर्मकृद्धर्मी सदक्षरमसत्क्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥ ५१ ॥

गभस्तिनेमिस्सत्त्वस्थस्सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥ ५२ ॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥ ५३ ॥

सोमपोऽमृतपस्सोमः पुरुजित् पुरुसत्तमः ।
विनयो जयस्सत्यसन्धो दाशार्हस्सात्त्वतांपतिः ॥ ५४ ॥

जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥ ५५ ॥

अजो महार्हस्स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दस्सत्यधर्मा त्रिविक्रमः ॥ ५६ ॥

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ॥ ५७ ॥

महावराहो गोविन्दस्सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ५८ ॥

वेधास्स्वाङ्गोऽजितः कृष्णो दृढस्सङ्कर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥ ५९ ॥

भगवान् भगहा नन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यस्सहिष्णुर्गतिसत्तमः ॥ ६० ॥

सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिविस्पृक् सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥ ६१ ॥

त्रिसामा सामगस्साम निर्वाणं भेषजं भिषक् ।
सन्यासकृच्छमश्शान्तो निष्ठा शान्तिः परायणम् ॥ ६२ ॥

शुभाङ्गश्शान्तिदस्स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ६३ ॥

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाश्श्रीवासश्श्रीपतिश्श्रीमतां वरः ॥ ६४ ॥

श्रीदश्श्रीशश्श्रीनिवासः श्रीनिधिश्श्रीविभावनः ।
श्रीधरश्श्रीकरश्श्रेयः श्रीमाँल्लोकत्रयाश्रयः ॥ ६५ ॥

स्वक्षस्स्वङ्गश्शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।
विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥ ६६ ॥

उदीर्णस्सर्वतश्चक्षुरनीशश्शाश्वतस्स्थिरः ।
भूशयो भूषणो भूतिरशोकश्शोकनाशनः ॥ ६७ ॥

अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥ ६८ ॥

कालनेमिनिहा शौरिश्शूरश्शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥ ६९ ॥

कामदेवः कामपालः कामी कान्तः कृतागमः ।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ॥ ७० ॥

ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ७१ ॥

महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥ ७२ ॥

स्तव्यस्स्तवप्रियस्स्तोत्रं स्तुतस्स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ७३ ॥

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥ ७४ ॥

सद्गतिस्सत्कृतिस्सत्ता सद्भूतिस्सत्परायणः ।
शूरसेनो यदुश्रेष्ठस्सन्निवासस्सुयामुनः ॥ ७५ ॥

भूतावासो वासुदेवस्सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदोऽदृप्तो दुर्धरोऽथापराजितः ॥ ७६ ॥

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तश्शतमूर्तिश्शताननः ॥ ७७ ॥

एको नैकस्सवः कः किं यत्तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥ ७८ ॥

सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमश्शून्यो घृताशीरचलश्चलः ॥ ७९ ॥

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृत् ।
सुमेधा मेधजो धन्यस्सत्यमेधा धराधरः ॥ ८० ॥

तेजोवृषो द्युतिधरस्सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥ ८१ ॥

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥ ८२ ॥

समावर्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥ ८३ ॥

शुभाङ्गो लोकसारङ्गस्सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥ ८४ ॥

उद्भवस्सुन्दरस्सुन्दो रत्ननाभस्सुलोचनः ।
अर्को वाजसनिश्शृङ्गी जयन्तस्सर्वविज्जयी ॥ ८५ ॥

सुवर्णबिन्दुरक्षोभ्यस्सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः ॥ ८६ ॥

कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृताशोऽमृतवपुस्सर्वज्ञस्सर्वतोमुखः ॥ ८७ ॥

सुलभस्सुव्रतस्सिद्धश्शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥ ८८ ॥

सहस्रार्चिस्सप्तजिह्वस्सप्तैधास्सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥ ८९ ॥

अणुर्बृहत् कृशस्स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतस्स्वधृतस्स्वास्यः प्राग्वंशो वंशवर्धनः ॥ ९० ॥

भारभृत् कथितो योगी योगीशस्सर्वकामदः ।
आश्रमश्श्रमणः क्षामस्सुपर्णो वायुवाहनः ॥ ९१ ॥

धनुर्धरो धनुर्वेदो दण्डो दमयिताऽदमः ।
अपराजितस्सर्वसहो नियन्ता नियमो यमः ॥ ९२ ॥

सत्त्ववान् सात्त्विकस्सत्यस्सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः ॥ ९३ ॥

विहायसगतिर्ज्योतिस्सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनस्सूर्यस्सविता रविलोचनः ॥ ९४ ॥

अनन्तहुतभुग्भोक्ता सुखदो नैकदोऽग्रजः ।
अनिर्विण्णस्सदामर्षी लोकाधिष्ठानमद्भुतः ॥ ९५ ॥

सनात् सनातनतमः कपिलः कपिरव्ययः ।
स्वस्तिदस्स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः ॥ ९६ ॥

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगश्शब्दसहः शिशिरश्शर्वरीकरः ॥ ९७ ॥

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥ ९८ ॥

उत्तारणो दुष्कृतिहा पुण्यो दुस्स्वप्ननाशनः ।
वीरहा रक्षणस्सन्तो जीवनः पर्यवस्थितः ॥ ९९ ॥

अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥ १०० ॥

अनादिर्भूर्भुवो लक्ष्मीस्सुवीरो रुचिराङ्गदः ।
जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥ १०१ ॥

आधारनिलयो धाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगस्सत्पथाचारः प्राणदः प्रणवः पणः ॥ १०२ ॥

प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥ १०३ ॥

भूर्भुवस्स्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥ १०४ ॥

यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ।
यज्ञान्तकृद्यज्ञगुह्यम् अन्नमन्नाद एव च ॥२०५॥

आत्मयोनिस्स्वयंजातो वैखानस्सामगायनः ।
देवकीनन्दनस्स्रष्टा क्षितीशः पापनाशनः ॥२०६॥

शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथाङ्गपाणिरक्षोभ्यस्सर्वप्रहरणायुधः ॥२०७॥

सर्वप्रहरणायुध ॐ नम इति ॥

वनमाली गदी शार्ङ्गी शङ्खी चक्री च नन्दकी ।
श्रीमान्नारायणो विष्णुर्वासुदेवोऽभिरक्षतु ॥१॥

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ॥२॥

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात् किञ्चित् सोऽमुत्रेह च मानवः ॥३॥

वेदान्तगो ब्राह्मणस्स्यात् क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धस्स्यात् शूद्रस्सुखमवाप्नुयात् ॥४॥

धर्मार्थी प्राप्नुयाद्धर्मम् अर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात् कामी प्रजार्थी चाप्नुयात् प्रजाम् ॥५॥

भक्तिमान् यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत् प्रकीर्तयेत् ॥ ६ ॥

यशः प्राप्नोति विपुलं याति प्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥ ७ ॥

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान् बलरूपगुणान्वितः ॥ ८ ॥

रोगार्तो मुच्यते रोगाद् बद्धो मुच्येत बन्धनात् ।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥ ९ ॥

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥ १० ॥

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥ ११ ॥

न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥ १२ ॥

इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मा सुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः ॥ १३ ॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥ १४ ॥

द्यौस्सचन्द्रार्कनक्षत्रं खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥ १५ ॥

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥ १६ ॥

इन्द्रियाणि मनो बुद्धिस्सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥ १७ ॥

सर्वागमानामाचारः प्रथमं परिकल्पितः ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥ १८ ॥

ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ॥ १९ ॥

योगज्ञानं तथा सांख्यं विद्याश्शिल्पादिकर्म च ।
वेदाश्शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् ॥ २० ॥

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रीन्लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ॥ २१ ॥

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥ २२ ॥

विश्वेश्वरमजं देवं जगतः प्रभुमव्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥ २३ ॥

न ते यान्ति पराभवम् ॐ नम इति ॥

अर्जुन उवाच—

पद्मपत्रविशालाक्ष! पद्मनाभ! सुरोत्तम! ।
भक्तानामनुरक्तानां त्राता भव जनार्दन! ॥

श्रीभगवानुवाच—

यो मां नामसहस्रेण स्तोतुमिच्छति पाण्डव ।
सोऽहमेकेन श्लोकेन स्तुत एव न संशयः ॥

स्तुत एव न संशय ॐ नम इति ॥

व्यास उवाच—

वासनाद्वासुदेवस्य वासितं ते जगत्त्रयम् ।
सर्वभूतनिवासोऽसि वासुदेव नमोस्तु ते ॥

श्रीवासुदेव नमोस्तु त ॐ नम इति ॥

पार्वत्युवाच—

केनोपायेन लघुना विष्णोर्नामसहस्रकम् ।
पठ्यते पण्डितैर्नित्यं श्रोतुमिच्छाम्यहं प्रभो ! ॥

ईश्वर उवाच—

श्रीराम राम रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं रामनाम वरानने ॥

श्रीरामनाम वरानन ॐ नम इति ॥

ब्रह्मोवाच—

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥

सहस्रकोटीयुगधारिण ॐ नम इति ॥

सञ्जय उवाच—

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

श्रीभगवानुवाच—

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ १९॥

* * *

आर्ताः विषण्णाः शिथिलाश्च भीताः
घोरेषु च व्याधिषु वर्तमानाः ।
सङ्कीर्त्य नारायणशब्दमात्रं
विमुक्तदुःखास्सुखिनो भवन्ति ॥ २०॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि ॥

॥ हरिः ॐ ; सर्वं श्रीकृष्णार्पणमस्तु ॥

* श्रीविष्णुसहस्रनामस्तोत्रं समाप्तम् *

अनुबन्धः

पञ्चायुध स्तोत्रम्

द्वादशनाम पञ्जरम्

पाठसमापन मंगलम्

5-6 ७६०

~~[illegible]~~ श्री महाविष्णोः

सहस्रनामावलिः

पाठारंभमङ्गलम्

श्रीभाष्यकार गुरुपरम्परा

ॐ अस्मद्गुरुभ्यो नमः — १ ॐ अस्मत्परमगुरुभ्यो नमः

श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम् ।
यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

श्रीपराशरभट्टार्यः श्रीरङ्गेश पुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

वन्दे गोविन्दतातौ, मुनिमथ मनवै लक्ष्मणार्यं, महान्तं
ध्यायेयं, यामुनार्यं मम हृदि तनवै, राममेवाभियायाम् ।
पद्माक्षं प्रेक्षिषीय, प्रथममपि मुनिं नाथमीडे, शठारिं
स्तौमि, प्रेक्षेय लक्ष्मीं, शरणमशरणः श्रीधरं संश्रयेयम् ॥

२ ॐ अस्मत्सर्वगुरुभ्यो नमः ॥

ॐ नमो गजवक्त्राद्यैः पारिषद्यैः प्रशासते ।
श्रीरङ्गराजसेनान्ये सूत्रवत्या समेयुषे ॥

~~कृष्णद्वैपायनायेदं नमो नारायणाय~~
१ ~~यद्वामुख्यायणा वेदा महाभारत पञ्चमाः~~ ॥

नमो नारायणायेदं कृष्णद्वैपायनात्मने ।
यद्वामुख्यायणा वेदा महाभारतपञ्चमाः ॥

४/२/१९८०

अनुबन्धः (ii)

भाष्य निर्वचन वार्तिकसारः

अनुबन्धः (ii)

भाष्यनिर्वचन-वार्तिक-सारः

संकेत:- (भा) भट्टभाष्यम् (नि) निर्वचनभाष्यम्
(वा) वार्तिकम्

नमस्त्रिगुणनिर्व्यूढप्रकृत्यङ्गाय जिष्णवे।
जगदुद्योतनस्फारज्ञानानन्दाय विष्णवे॥

शुक्लाम्बरधरम्

वा :- पूर्वमादिषट्श्लोकी इयं द्वयमन्त्रसारः।

विष्णोर्नामसहस्रस्य

वा :- अयं बहुदेशकोशानुसारी पाठः; "ऋषिर्नाम्नां" इत्यादिपाठस्तु उद्देश्यव्याभावादिदोषसंवलितः।

विश्वाधारं

वा :- योगिभिः हृदये जीवस्य तदाधारत्वेन भगव[illegible]दाकारस्य च ध्येयत्वात् विश्वशब्दः सर्वावयवरुधिरप्रसारणद्वारा अवयवान् विशत् हृदयं, प्रकाशद्वारा शरीरावयवान् विशन्तं जीवात्मानं च

अभिधत्ते। ध्यानस्य अंगुष्ठाद्यावपि दर्शनात् तद्वारणायैव विश्वशब्दनिर्देशः। एतेन विश्वाकारमिति पाठान्तरं नाहतमित्येव।

योगिहृद् ध्यानगम्यम्

वा :- हृच्छब्देनात्र "हृदा मनीषा मनसाभिकॢप्तो य एनं विदुरमृतास्ते भवन्ति" इति भक्तिविशेषः उपनिषदुद्घुष्टः प्रदर्शितः। एतेन 'योगिभिर्ध्यानगम्यं' इति केवलध्यानपरः पाठः नादृत इत्येव।

त्रिककुत्, धाम ६२-६३

भा :- (1) त्रिककुद्धामा = त्रिपाद्विभूतिलक्षणं परमं धाम यस्य सः।
(2) त्रिककुब्धामेति केचित्। उभयथापि अवयवाः लक्ष्यन्ते।
(3) अथवा :- त्रिककुप्शब्दः ज्ञानादिषड्गुणयुगळत्रिकलक्षकः। धाम = धर्मी = पूर्णषाड्गुण्यविग्रह इत्यर्थः।

(4) यद्वा :- आर्षं निरुक्तं त्रिककुत् ।

"तथैवासं त्रिककुद्रो वाराहं रूपमास्थितः।
तस्मात् त्रिककुदित्युक्तः"

अस्मिन् पक्षे धार्मेति नामान्तरं ज्योतिरिति चार्थः।

नि :- व्याख्यातॄणामभिप्रायो नामैकत्वेऽपि कीर्तितः।

वा :- लक्षणया त्रिककुद्व्याख्यानं अस्वरसमिति यद्वेति पक्षान्तरारम्भस्य बीजम् । "व्याकरण-निरुक्तार्थ निर्वचन प्रस्थानेन नामानि निरुच्यन्ते" इति भाष्यारम्भे प्रतिज्ञानात्, निर्वचनप्रदर्शनाच्च, नामभेदपक्ष एव भाष्यकाराभिमतः।

महाद्रिधृत् २८३

भा :- महान्तं मन्दरं मथने धृतवान् ।

वा :- एतेन 'धृक्' इतिपाठो नादृत इत्येव ।

विश्वसृक् २४२

नि :- सृज=विसर्गे । ऋत्विगित्यादिसूत्रे सृजेः क्विनो विहिततया क्विनप्रत्ययस्य कुः । तत्र बहुव्रीह्याश्रयणात् क्विप्यपि कुः । यथासंख्यपरिभाषया जस्य गः पाक्षिकमवसानचर्त्वम् ।

तो :- एतेन 'सृड्' इति पक्षः 'दृग्' इति पाठश्च नादृत इत्येव ।

इष्टोऽविशिष्टः ३२०

शा :- एवमुदरेण श्रेतैः (चतुर्मुखादिभिः) मुख्यैरपि अविशेषेण जनयित्रीव वाञ्छित इति इष्टः अविशिष्टः ।

नि :- एकं नाम ।

वा :- एतेन नामभेदपक्षो नादृत इत्येव ।

महर्द्धि-मर्द्धः २५२-३५३

वा:— महर्द्धिः, मर्द्धः। आर्षसंहितेति वृद्धाः। एतेन "ऋद्धः" इति लौकिकः पाठः प्रत्युक्तः। "मर्द्धः" इति लिपि-प्रकारस्तु न शास्त्रीयः। यथा:—

देवतास्तु त्रयस्त्रिंशद् व्यज्यन्ते व्यंजनैरपि।
अंशैस्तास्तानि ऊर्जन्ति चान्द्रैः षोडशभिस्स्वरैः॥
देवानामवमो ह्यग्निस्स्यात् तस्य रेफो हि वर्णकः।
"वक्र" इत्यत्र रेफस्यावमस्याधस्स्थितिर्लिपौ॥
प्राधान्ये "र्व्यर्क" इत्यत्र निकर्षादुर्ध्वतो धृता।
स्वतस्स्वरेण संयोगे स्वरूपेण स्थितिर्मता॥
अमूर्त प्राण्भुवानस्य न स्वरूपच्युतिः क्वचित्
दिक्पालदेवब्लासुरौ नैरृतोऽप्यत्र लक्ष्यताम्"
इति॥

हविः, हरिः ३६२-३६२

धा: (१) समयं ज्ञात्वा तेभ्यः (धनिकेभ्यः) दीयते, तैरादीयते च इति हविः। तद्विघ्नमपहरतीति हरिः।

(२) हविर्हरिरित्येकं नाम : —

इडोपहूतं गेहेषु हरे भागं क्रतुष्वहम्।
वर्णश्च मे हरिः श्रेष्ठः तस्माद्धरिरहं स्मृतः॥

वा :— श्राव्ये अथवेत्यादि शब्दाभावात्
अनारभ्याधीतमिदं वाक्यं न स्वाभिमतपरम्;
किन्तु नामैक्यपक्षस्य प्रदर्शनार्थम्।
किञ्च "वर्णश्च मे हरिः" इत्युत्तरार्धे
केवलहरित्वस्यैव विवृतत्वात्, पूर्वार्धेऽपि
चकार समुच्चितार्थे तदेवग्राह्यम्; अतः
"हविर्हरिः" इत्येकनामत्वेऽस्य तात्पर्यम्।
परत्र ६५६ "हरि" नाम्न्यपि
एतन्निरुक्तश्लोकस्यैव निदर्शनात्,
एकत्र हरणात् अन्यत्र हरिद्वर्णात्
हरिः इति न पौनरुक्त्यम्।
निरुक्तश्लोके "उपहूतं भागं"
इति तु हरणकर्मीभूत वस्तुप्रदर्शनार्थम्;
न तु नामैक्यनिर्वाहार्थम्; तत्रैव —

निगमने "तस्माद्धरिरहं स्मृतः" इति
केवलं हरित्वस्यैव स्थापनात्। अन्यथा
"तस्मादस्मि हविर्हरिः" इत्येव निर्वचन
मभविष्यत्। तथा च आदान प्रदान
प्रतिसम्बन्धिभेदात् हविरिति नाम्नोऽपि
न पौनरुक्त्यम्

विरतः, मार्गः ३९९-४००

श्री:-(1) निसर्ग नैरपेक्ष्येण कृपणाद्राज्यादेः
विरतः। शरद्वदादिमुनिभिः मृग्यत इति
मार्गः

(2) 'विरजोमार्ग' इति पाठे निर्दोषस्तद्
दर्शितो मार्गः इति।

वै:- पाठान्तरव्याख्यानमिदं प्रदर्शनार्थं,
न तु स्वाभिमतम्।

प्रणमः ७२२

श्री:- 'प्रणमयति' श्रोत्या निरुक्त्या स्वगुणैः
चराचरनमनात् प्रणमः।

वा:- 'प्रणव' इति पाठान्तरदर्शनेऽपि तस्य च
उत्तरत्र नाम्नो व्युत्पत्तेश्च ~~[illegible]~~ दर्शयिष्य
माणत्वात् अन्यत्र तत्॥

निवृत्तात्मा ४५५

आ :- तत्र निवृत्तिधर्माचार्यो नरनारायणादिः।
परमवैराग्यख्यापनाय विषयेभ्यः प्रत्याहृतमनाः।

वा :- एतेन विमुक्तात्मेति पाठो नादृत इत्येव।

सदक्षरं - असत्क्षरम् ४८१-४८२

आ :- एवं नित्यनिरुपाधिकसद्भावसाद्गुण्याभ्यां सत्।
अस्यच विशेषणं अक्षरम्।
अप्रशस्तपापप्रसक्तेषु असत्, क्षरं च।

नि :- यद्वा :- सविशेषणे इमे द्वे नामनी ;
'अक्षरं सत्', 'क्षरं असत्' इति।

वा :- अत्र भाष्ये पाठान्तरनामभेदादि प्रदर्शना
भावात् क्रमेणैव प्रतीकधारणाच्च तादृशं
भेदादिकं नादृतमित्येव।
निर्वचनकर्तुः पाठान्तरं तु "सदसत्क्षरमक्षरं"
इतिगम्यते। अयमेकदेशिपाठ नातीवादरणीयः।

परायणः ५१२

आ :- परमा भक्तिः अस्मात्।

वा :- भाष्ये बहुव्रीहेरेव दर्शितत्वात् बहुव्रीहिपदानां
विशेष्यलिंगत्वनियमात् पुल्लिंगपाठएव युक्तः
'विष्णोर्नामसहस्रं' इत्यादिलिंगबलात्
सहस्रमपि नाम्नां विष्णोरेव परमपुरुषस्य विशेषणम्,
नतु पुल्लिंगमेव विष्णोः स्त्रीलिंगं देवतायाः क्लीबलिंगं
ब्रह्मणो विशेषणम्। पञ्चसिद्धान्तनिष्कर्षनिर्णयश्च
ब्रह्मणः परमपुरुषत्वमेवस्थापयतीति समवधेयम्।

अशोकः ६३८

भा:- एवं कस्यचिदप्यनाद्यस्याहानात् तद्विषये अशोकः = विशोकः।

वा:- कस्यचिदपीत्याद्यवधारणात् शोकात्यन्ताभाव एव गम्यते; न तु शोकध्वंसः इति अशोकपाठ एव भाष्यकारसम्मतः श्रेयान्।

शौरिः ; शूरः ६४९-६५०

भा:- "उत्पलावदके देशे शौरिसंज्ञोऽच्युतः स्थितः।"
"धराधरे चित्रकूटे शूरः रामः"

वा:- एतेन वीरश्शौरिरिति पाठो नाहत इत्येव, अर्चावतारप्रकरणात्।

स्थूलः ६८७
भा:- काले तत्त्वप्रमाणसिद्धो स्थूलः इति।
वा:- एतेन स्थूलितिपाठो नाहत इत्येव।

सत्परायणः ७०८

भा:- पुल्लिङ्गत्वे, सन्तोऽस्य परायणमिति। यथा:-
"ज्ञानीत्वात्मैव मे मतम्"

वा:- क्लीबपाठे भक्तैः प्राप्य इत्यर्थस्य विवरणेऽपि तस्य नामान्तरेषु दर्शनात् सम्प्रदायरहस्यस्य ज्ञानिनामात्मत्वस्य कुत्राप्यनिरूपणात् पुंपाठ एव युक्तः।

त्रिलोकधृत् ७५०

भा:- अशेषाणामपि धारणपोषणयोः अरकत्वात् इति।

नि:- (१) त्रीन् लोकान् धरतीति। धृञ् = धारणे। षष्ठीसमासोऽयम्।
(२) धृक् इति पाठे धृष्णोतीति। ञि धृषा = प्रागल्भ्ये। लक्षणया वा तदर्थलाभः।

वा:- धारणस्य अभिधेयत्वे उपलक्षणविधया पोषणादिलाभो ज्यायान्। न तु लक्षणया इति इष्टः पन्थाः।

वाजसनिः ८०२

~~अनन्तहुतभुग्भोक्ता~~

नि:- वाजं = ऐहिकमन्नम्। सनति = सम्भजति। सर्वधातुभ्य इति इन्।

वा:- एतेन वाजसन इति पाठो नादृत इत्येव।

पर्जन्यः - पावनः ८२६-८२७

आ:- तथा पवत इति पवनः। पविर्गत्यर्थः।

वा:- अत्र भट्टोक्त्या ~~अनुग्राहकस्वरूप~~ अनुग्राहकस्वरूपप्रकरणात् पावन इति पाठ एव पण्डितैः पठितः। भाष्यादर्श कोशैकदेशे पवन इति पठितम्। अत्र "पावनस्सर्वलोकानाम्" इति, भाष्योक्तमपि द्रष्टव्यम्। अर्थानुसारात्, नामसाम्यात्, भाष्यकोशेषु बहुषु पावन इत्येव पण्डितैः पाठात्, शांकरेपि निदर्शनात्।

पुरस्तात्

अनन्तहुतभुग्भोक्ता ८८१

आ:- इन्द्रो हुतभुक्, प्रजापतिः भोक्ता, तौ महान्तौ अस्येति।

नि:- अनन्तौ = अनवधिकमाहात्म्यतया महान्तौ।

वा:- एतेन पक्षो निरस्तः "अनन्तो हुतभुक्" इति पाठश्च नादृतः

नैकदः ८९२

आ:- एकं ददतीति एकदाः तद्विरुद्धाः नैकदाः असंख्येय ~~ब्रह्म~~ अलंकारदायिन्यो सरसो ऽस्येति।

वा:- एतेन नैकज इति पाठो नादृत इत्येव।

अद्भुतः ८९६

ख्या:- अपूर्ववत् अतिविस्मयनीयः।

वा:- विस्मयत्वेनानिरूपणात् पुल्लिंगपाठात्। सन्दिग्धासन्दिग्धयोः असन्दिग्धे प्रतिपत्तिः इतिन्यायः। क्लीवत्वे विस्मयो विस्मयनीयो वेति सन्देहात्।

कपिरव्ययः ९००

नि:- अनश्वरस्सुखं पाति स उक्तः कपिरव्ययः।

वा:- ~~कपित्वस्यास्य मुख्यत्वात्~~ व्ययः पूर्वतोऽस्त्वेव। एवं अव्ययाय कपये इति मन्त्रपाठसिद्धेः, नामभेदश्च निरस्तः, अव्यय इति पाठश्च नादृत इत्येव।

जीवनः ९५०

ख्या:- त्राहं गन्धकेन जीवयन्।

वा:- कर्तरि ल्युप्रत्ययस्य शास्त्रा सूचनात् कर्तुश्चात्र पुंस्त्वनिर्णयात् पुंस्त्वमेव ज्यायः।

प्राणधृत् ९६२

ख्या:- तान् मातृवत् धारयतीत्येति।

वा:- एतेन प्राणभृदिति पाठो नादृत इत्येव।

कीर्तनीयस्य

भा:- अद्यप्रभृति भगवान् कीर्तनारम्भमर्हतीत्युक्तं कीर्तनीयस्येति।

वा:- एतेन 'कीर्तनं यस्य' इति पाठः प्रत्युक्तः

प्रजार्थश्चाप्नुयात् प्रजाः

वा:- अनुक्रमेण प्रजाः इति बहुवचनमेव ज्यायः।

याति प्राधान्यमेव च

वा:- अस्मत्संप्रदायिकः प्राचीनबहुकोशानुसारी चायमेव पाठः। पादचतुष्टयेपि चतुर्णां विधेयत्वानुसारेण क्रियावाचकपदानामपि चतुर्णां कृत्यौचित्याच्च।

मेवोपजायते

वा:- निर्धारकत्वसामर्थ्यौचित्यादेवकार एव ज्यायान्

युज्येतात्मा

भा:- नियमवतो भक्तस्य आनुषङ्गिणीं अभ्युदयसिद्धिमाह। आत्मा = चेतनः।

वा:- एतेन आत्मसुखेति निश्रेयसार्थकः पाठः प्रत्युक्तः

द्यौस्सचन्द्रार्कनक्षत्रं खं

वा:- खशब्दसमभिव्याहारात् द्युशब्दस्य स्वर्गएवार्थः। स्वस्यैव च चन्द्रार्कनक्षत्रवैशिष्ट्यमित्यर्थः।

आचारः प्रथमं परिकल्पितः

भा:- प्रथमप्रतिपाद्यधर्मः।

वा:- / एतेन कल्प्यत इति पाठः प्रत्युक्तः सङ्कल्पत इति नादृतश्च।

प्रधानार्थ इत्यर्थः

आचारप्रभवो धर्मः

श्रा:- आचारः = शौचादिः, तदंगः श्रौतो धर्मः इति।

वा :- तदंग इति बहुव्रीहिः। आचारस्य प्रभवो मूलकारणं अंगानां अंगी प्रधानयाग इव धर्मः। एतेन आगमाचारधर्मोच्युतानां अप्रच्युत एव मूलमूलिभावः प्रदर्शितो भवति। "आचारः प्रथमो धर्म इति तु प्रथमपरिकल्पितत्वोक्त्या पिष्टपेषण न्यायं मूलमूलिभावभंगं च प्रसञ्जयतीत्यलम्।

योगज्ञानम्

श्रा:- योगस्य ज्ञानम्।

वा:- योगो ज्ञानं इति पाठे तु ज्ञानपदं अनालंबं अनन्वयमेवावलम्बते।

शिल्पानि कर्म च

श्रा:- धनुरायुर्गान्धर्वप्रभृतीनि दृष्टार्थानि उपविद्याः = शिल्पानि।
सर्वत्रानुष्ठेयं = कर्म।

वा:- एतेन शिल्पादीति कर्मविशेषणपाठः प्रत्युक्तः।

जगतः प्रभवाप्ययम्

वा:- अयं बहुदेशकोशानुसारी पाठः। सहस्रनामाध्यायप्रतिपाद्योपक्रमश्च यथा:- "जगत्प्रभुं अनन्तं" इति प्रथमं, ततश्च "यतस्सर्वाणी" त्यादिना चरमं च प्रतिपन्नः; तदुपसंहारश्चात्र तथा "विश्वेश्वरं-अजं" इत्यनेन प्रथमं, ततश्च "प्रभवाप्यय"मित्यनेन चरमं च प्रतिपन्नः। "प्रभुमव्यय"मिति पाठस्तु विश्वेश्वरशब्देन पुनरुक्तिदोषं उपक्रान्तब्रह्मलक्षणानुपसंहारं च स्वकण्ठे धारयन् स्वयं विघटते।

(यमेन)

सहस्रनामतस्तुल्यम्

वा:- तोलनस्यावधि सापेक्षत्वात् पञ्चम्यर्थे तसिर्युक्तः। तुल्यशब्दपर्यायस्तत्तुल्य शब्दोयमग्रेति कश्चिदाह। "स्पष्टास्पष्टयोः स्पष्टे प्रतिपत्तिरिति" न्यायेनात्र "नामतस्तुल्य"मित्येव न्याय्यः।

शश्वते

वा :- शाश्वानिति शब्दमजानानः कश्चन शासते इति पाठं प्रक्षिपन्, नतेन शास्यते।

सहस्रकोटीयुगधारिणे

वा:- "अपि माषं मषं कुर्यात् छन्दोभङ्गं न कारयेत्" इति दिशा ईकारान्तः कोटीशब्दो बहुमन्तव्यः।

यत्रयोगेश्वरः

वा :- "योगानां ईश्वरः" इति रामानुज भाष्यम्। एतेन योगीश्वरपाठः प्रत्युक्तः।

ध्रुवानीतिर्मतिर्मम।

वा :- "नीतिश्च ध्रुवाः निश्चलाः इति मतिर्ममे ति" इति रामानुजभाष्यम्, एतेन काश्मीरादिपाठाः नादृताः इत्येव।

सुखिनोभवन्तु

वा :- भवन्तु इति अपपाठः।

सर्वत्रमच्छिद्रम्।

वा :- सर्वं त्रायतइति सर्वत्रम्। न च्छिद्रमस्मिन् किञ्चित् कदाचिदपीत्यच्छिद्रम्। एतेन सर्वत्र निश्छिद्रमिति पाठप्रक्षेपः परिहृतो भवति।

वेदाच्छास्त्रं परं नास्ति

वा :- उद्देश्य-विधेय-प्रतियोग्यादीनां स्पष्टप्रतीतेः, वाक्य औपम्यव्यञ्जका ऽङ्कुरान्तर सत्त्वप्रतीतेः, वाक्य द्वैधीभाकरत्वौचित्याच्च, अयमेव पाठः श्रेयान्।

वेदशास्त्रादिति तु न तथा। वेदशास्त्रात्परं किं नास्तीति प्रश्ने; शास्त्रमित्येव स्वल्पत्वयितव्यं भवति। तथा च शेषपूरणन्यायावतारः। तथा च [illegible]गः।

स्थोपवो| क्लेशे खलु तदङ्गाय न्याय [illegible] सम्भवात्, नैव वेदाच्छास्त्रमित्यक्लेशेनैवान्वयसम्भवात्। परशब्दस्य पर्मपि प्रकर्षा न्यायावतार प्रसंगः। परशब्दस्य पर्मपि प्रकर्षार्थकम्।

नारायणायेति समर्पयामि

वा :- समर्पयेत्तदिति भागवतपुराणे मौलोस्थपाठः। प्रयोग समये पूर्वाचार्यैः समर्पयामीति पठितम्। अत्र श्रीमन्नारायणेतिपठन्तः प्रत्यपन्याय- छन्दोभङ्ग- मौलपाठविरोधादिभिरसङ्गताः एवेति स्पष्टम्।

No.

DEBIT A/c.

MAIN CASH DEBIT VOUCHER

Date

Being Payment towards

Rs. | P.

Partner.

Payee's

सर्वत्रमच्छिद्रम्।

वा:- सर्वं त्रायत इति सर्वत्रम्। न च्छिद्रमस्मिन् किञ्चित् कदाचिदपीत्यच्छिद्रम्। एतेन सर्वत्र निश्छिद्रमिति पाठप्रक्षेपः परिहृतो भवति।

वेदाच्छास्त्रं परं नास्ति

वा:- उद्देश्य-विधेय-प्रतियोग्यादीनां स्पष्टप्रतीतेः, औपम्यव्यञ्जकालङ्कारान्तर सत्त्व प्रतीतेः, वाक्य
व, द्वयैकाकरत्वौचित्याच्च, अयमेव पाठः श्रेयान्।
वेदशास्त्रादिति तु न तथा। वेदशास्त्रात्परं किं नास्तीति प्रश्ने; शास्त्रमित्येव खलूत्तरयितव्यं भवति। तथा च शेषपूरणन्यायावतारः।

स्योपमो। क्लेशे खलु न्याय...गः। वेदाच्छास्त्रमित्यक्लेशेनैवान्वयसम्भवात् नैव न्यायावतारप्रसंगः। परशब्दद्वयमपि प्रकर्षार्थकम्।

नारायणायेति समर्पयामि

वा:- समर्पयेत्तदिति भागवतपुराणे मौलोऽस्य पाठः। प्रयोगसमये पूर्वाचार्यैः समर्पयामीति पठितम्। अत्र श्रीमन्नारायणेति पठन्तः प्रक्षेपन्याय-छन्दोभङ्ग-मौलपाठविरोधादिभिरसङ्गतमना एवेति स्पष्टम्।

MAIN CASH DEBIT VOUCHER

No. ________ Date ________

DEBIT A/c. ________	Rs.	P.

Being Payment towards ________

आपदामपहर्तारम्
इतः परं मुक्तकश्लोकषट्कं भगवतः
प्राप्यत्वे सति प्रापकत्वं निरूपयत्
मन्त्ररत्नं चरमपदं निरूपयति ।
एवं च स्तोत्रपाठोपक्रमे शुक्लां
बरधरं इत्यादिश्लोकषट्केन
यदुपक्षिप्तं तदुपसंहृतं भवतीति
सुघटितं पाठप्रस्थानम् ।

Partner. Payee's Signature

यदक्षरपदभ्रष्टम्

वा:- पारायणेषु दोषसम्भवः जिह्वाद्यनुल्लेखना दिभिः दृष्ट एव। अप्रमादादयोऽपि हि पुरुषदोषा ह्यसाधारणाः। यथा नत्कार्यम्:-
"सर्वस्सर्वगतस्स्थाणुः" 'सिद्धिस्सिद्धिः' 'अमृत्युक्' 'धामस्सत्यः' 'सिद्धसङ्कल्पः' 'कामः कामःप्रदः' "अमृतांशः" 'नैकश्शृङ्गः' 'सर्वसहा' 'शबर्दादिगः' 'बद्धोन्मुच्येत' 'अडलां श्रियमाप्नोति' 'दैत्याश्शनिबाणवर्षी' 'बिस्वं बिस्णुर्बसट्कारो' 'इन्तो विनित्त त्तित्त त्तियन्दी नवुसो वुसभं' (इष्टो विशिष्टश्शिष्टेष्ट शिखण्डी नहुषो वृषः।) इत्यादयो ह्यपपाठाः। एते भूना भवन्तो भविष्यन्तोऽपि निर्दोषिण्यमाचार्यैरनुशास्याः। अनुशिष्टानामपिस्खलने दोषो द्वाराय सर्वपाठान्ते श्लोकोऽयं पठ्यते।

कृतज्ञता

परस्तु
रूकपुराभिजातो
नल्लूरुपुर प्रसिद्धवैद्यवरः।
मधुगिरिनिवासरसिकः
कौण्डिन्यश्चक्रवर्तिवंशाख्यः।

वाधूलार्यपदाब्ज-
प्रणिहितभारस्सदर्थगम्भीरः।
आर्यो रामसमाख्यः
प्रकटीकृतनामनिर्वचनसारः॥

संततचिन्तितनाम-
प्रकारसत्पाठदर्शनोत्कण्ठः।
भगवद्भागवतानां
आचार्याणां च किंकरोऽकुण्ठः॥
निर्मितनानापुण्यः
श्रवणीयगुणाकरेषु यो गण्यः।
संसृतिरुग्णाशरण्यः
हरिरिव सौहार्दमात्रया पण्यः॥
यस्तु निकषोऽपि विदुषां
कृष्णगुणोल्लासनः पृथुस्कन्धः।
तमिमं सहृदयमुदये
भागवतं ग्रन्थरत्नमिव वन्दे।

निगमनम्

साशीतिशतसंस्थानविमर्शादस्ति वार्तिकम् ।
सहस्रनामपाठानुबन्धानां लघु शोधकम् ।

आगमं मन्त्रसिद्धान्तं जानानास्सज्जना इह ।
सहस्रनामव्याख्याणां वार्तिकं जानते२ऽसा ॥

रामाख्यसज्जनमनः प्रतिबिम्बशङ्के:
विष्णोरयं किलकृतः परिचोदनायाः ।
नाम्नां सहस्रमिह सत्पठितप्रकारं
निर्विघ्नमेवमिति वार्तिकसत्प्रबन्धः ॥

दृष्ट्वेमां लिख्यमानां कृतिमपि च मया
बालभावेन चेत्थं
चित्रस्था सापि लक्ष्मीः स्मितमिह तनुते
विष्णुवक्षाङ्कसंस्था ।

नाकस्मादेतदिष्टं तदिह विभुगुणप्रीति-
दत्तायताक्षी
लक्ष्मीः श्रीवैष्णवानां सदसि शिशुमिमं
क्रीडयत्येव मन्ये ॥

— ० —

इति विज्ञापकः श्रीरामशर्मा

10

अनुबन्धः (1)

सहस्रनाम तत्त्वम्

अनुबन्ध ४(i)

सहस्रनामतत्त्वम्

०/ ~~सर्वप्रहरणायुधाय~~

(1) मन्त्रसिद्धान्तमार्गश्च

आद्यन्तमन्त्रवर्णार्थे तत्त्वयोगविशेषतः।
विष्णोर्नामसहस्रस्य विशेषार्थो निरूप्यते।

वेदस्वरूपो गरुडस्तद्गति विष्णुरुच्यते।
विश्वासावश्च विष्णुस्स्यात् प्राप्यप्रापकभावतः।

विशब्देन प्रमाणं च प्रमेयं चाप्यशब्दतः।
शब्दार्थौ भयरूपत्वात् व्य इत्यमृतमक्षरम्।

(2) प्रधानार्थविनिर्णयः

विशब्दो विष्णुमेवाह धशब्दो धर्ममाह च।
सिद्धधर्मस्तु सिद्धान्तस्तत्त्वं विष्णुस्सनातनः।

(3) ब्रह्मलक्षणनिर्देशः

अकारार्थस्य विष्णोस्तु ब्रह्मणो लक्षणं स्फुटम्।
जगज्जन्मादिहेतुत्वं विश्वशब्देन केवलम्।
अमृतत्वप्रदत्वं हि सर्वबन्धनिवारणात्।
स्वतंत्रस्य स्फुटं लक्ष्म सर्वप्रहरणायुधात्।

(4) प्रतिपादनफलिका

शते शते सहस्रेऽस्मिन् आद्यमन्त्यं च नाम यत्।
विश्वं विष्णुं हि निर्वक्ति सर्वप्रहरणायुधम्।

~~शतकाद्यन्त्यनामानि~~

०/ अपर्युषितवाग्वृत्तिप्रतीतं तत् परात्परम्।
अक्षरं ब्रह्म सोंकारं सोऽहंकारापहं नुमः॥
प्रणतप्रणिधानेन चरतो यस्य चक्षुषी।
प्रणतस्तस्य पादाभ्यां पुरतो ये विपन्मुषी॥

(5) शतकाद्यान्त्यनामानि

(1) विश्वं सर्वादिरमृत्युः प्रभुर्नेयस्तथैव च।
शरीरभृतभृच्चैव वृषभाक्षो वसुस्तथा ॥
अर्कस्स्वस्तिद इत्याद्यं नाम्नां विष्णोश्शते शते ॥

(2) सिद्धिः प्रजापतिः कामप्रदो मार्गः पुरातनः।
गोप्ता च वासुदेवस्सुलोचनोऽव्ययः कपिः।
शतेशतेऽन्तिमं नाम सर्वप्रहरणायुधः ॥

(6) प्रधानार्थोपबृंहणम्

(1) तत्त्वम् :—
विश्वमित्यत्र तत्त्वं तु विष्णुः पूर्णो हि रक्षकः।
सिद्धिरित्यत्र तत्त्वस्य प्राप्यप्रापकता मता ॥

(2) हितम् :—
सर्वादिरिति स स्रष्टा कारणं ध्यायतां हितम्।
प्रजापतिरिति स्पष्टं हितं सर्वेश्वरो हरिः।

(3) पुरुषार्थः :—
अमृत्युरिति संहर्ता मृत्युमृत्युर्हि मोक्षदः।
कामप्रदस्स नित्यानां परं तत्त्वं हि भोगदः ॥

(4) परत्वम् :—
रक्षकस्य स्वरूपं हि परत्वं प्रभुरित्यतः।

(5) सौलभ्यम् :—
मार्गो नेयश्च (वक्त्येवं) (सौलभ्यं) रामकृष्णताम्।

(6) आचार्यत्वम् :–
पुरातन इति स्पष्टं सर्वदाचार्यरूपता।

(7) शरीरात्मभावः :–
शरीरभृतभृत्त्वेति सम्बन्धस्स्पष्टमत्र च।

(8) धर्माधारत्वम् :–
साध्योपायप्रदस्सोऽपि गोप्ता स्यात् फलरक्षकः।
वृषभाक्षो धर्ममूलं फलवर्षी च स स्मृतः।

(9) परः :–
नित्यप्राप्यो वासुदेवस्सुलभोऽपि परस्स्मृतः।

(10) व्यूहः :–
उपासकानुग्रहार्थं वसुर्व्यूहस्थितो हरिः।

(11) विभवः :–
सुलोचनो हि धर्मोऽसौ विभवेषु सविग्रहः।

(12) अर्चा :–
स्तूयमानोऽर्कि इत्यर्चा माहात्म्ये विभवैस्समा।

(13) अन्तर्यामी :–
कपिरव्यय इत्यन्तर्यामी सौख्याय योगिनाम्।

(14) प्राप्यः :–
प्राप्यतावच्छेदकं स्यात् तत्त्वं स्वस्तिद इत्यतः।

(15) प्रापकः :–
प्रापकस्स हि निर्विघ्नं सर्वप्रहरणायुधः।

(6) प्राप्यप्रापकभावः :—

विष्णुर्यैरिति स प्राप्यं सिद्ध्याद्यैः प्रापकं च सः

विष्णोर्नामसहस्रस्य पञ्चसिद्धान्तसारतः।
प्राप्यप्रापकभावो हि परमार्थोऽयमीरितः॥

(7) उक्तार्थसंग्रहश्चैव

स्वरूपं लक्षणं रूपं वृत्तं च विभवा गुणाः।
तत्त्वं स्थितं च सम्बन्धः पुरुषार्थश्च दर्शिताः।

(8) पञ्चसिद्धान्तनिर्णयः

(1) पञ्चसूरिस्तु विष्णुर्हि प्रसिद्धः परतादिभिः।
तस्यासौ खलु सिद्धान्तः पञ्चरात्र इति स्मृतः॥

(2) पाञ्चरात्रं हि पञ्चानां सिद्धानां श्रुतनिर्णयः।
विष्वक्सेनादयस्ते तु सिद्धाः शास्त्रेषु विश्रुताः॥

(3) तत्रैकस्य प्रधानस्य विष्वक्सेनस्य पञ्चभिः।
परांकुशादिभिश्शिष्यैः सिद्धान्तोऽयं स्थिरीकृतः॥

(4) पञ्चाचार्यपदं प्राप्तो रामानुजमुनिर्महान्।
पञ्चायुधाकृतिर्विष्णोः सिद्धान्तस्यास्य रक्षकः॥

(5) श्रुतिं तथेतिहासं च पुराणं पञ्चरात्रकम्।
दिव्यप्रबन्धं पञ्चैवं प्रमाणं पण्डिता जगुः।

प्र

एतं हि पञ्चसिद्धान्त निष्ठानिर्णय उद्धृतः ।
श्रीपराशरभट्टार्यैः वेदान्तार्यादिभिस्तथा ॥

यथा :—

उपायस्स्वप्राप्तेरुपनिषदधीतस्स भगवान्
प्रसत्त्यै तस्योक्ते प्रपदननिदिध्यासनगती ।
तदारोहः पुंसस्सुकृतपरिपाकेन महतां
निदानं तत्रापि स्वयमखिलनिर्माणनिपुणः ॥
इति ।

(९) सांख्यं च योगं

परोव्यूहश्च विभवो, च नियामी पुनः पर ।
इति सद्भिर्ध्येयमत्या विष्णोर्नामसहस्रकम् ॥
चतुर्मूर्तिं चतुर्बाहुं चतुर्व्यूहं चतुर्गतिम् ।
ध्येयं चतुरात्मानं चतुर्भावं चतुर्भुजम् ॥
चतुर्विधानां जीवानामपवर्गं चतुर्विधम् ।
वर्गतो शेषलाभाभ्यां षाड्गुण्यागमसारतः ॥

(१०) षाड्गुण्यागमसम्भवम्

अथैवं षट्पदं मन्त्रं प्राधान्येन परिग्रहात् ।
नियुक्तं तदिदं स्तोत्रं तस्य स्यादुपबृंहणम् ॥
षडङ्गयोगसम्पूर्णं न्यासं ब्रह्म परात्परम् ।
षट्पदध्वनितं लोकैः षट्पदीति संकीर्तितम् ॥

(१) सांख्यै च योगजं तत्त्वम्

सहस्रमिति निर्देशात् सहस्रारसमन्वयात् ।
आगमेषु सहस्रारविष्णुसंकल्पकल्पनात् ॥
पुराणेषु शतार्थानां दशकैश्च निदर्शनात् ।
प्रधानार्थपरिच्छेदि शतकाद्यान्त्य नामभिः ॥
पंचसिद्धान्तनिष्ठायां मूलतः पूर्णदर्शनात् ।
संख्याभिरर्थसम्बद्धविशेषार्थसमन्वयात् ॥
धेय मन्त्रवान्तत्र संख्यानां नियमाच्छास्त्ररूपणात् ।
षडध्वागमसिद्धान्तचतुर्भुजसमन्वयात् ॥
भक्तशेषसमुद्धारप्रसिद्धपरतोदयात् ।
अन्यूनानतिरिक्तं तदाचार्यैरनुशासनात् ॥

ब्रह्मस्वरूपं त्रिविधं परत्व-व्यूह-वैभवैः ।
विभवेऽन्तर्भवत्यर्चान्तर्यामीचेति पंचधा ॥

आविश्वादावरारोहं परो गुरुकसम्मितैः ।
वैयूहवासुदेवस्तु परेऽन्तर्भावितः पुरः ॥
आमहातपसो व्यूह आनिरुद्धं मषीमितैः ।
सुरानन्दाद् दिशान्तं च विभवो रामसम्मितैः ॥
तत्रार्चा भूशयात्कान्तापर्यन्तं सरवसम्मितैः ।
विंशत्या च विशेषोऽत्र कुम्भादाकान्तमित्यपि ॥
शाश्वतस्थिरपर्यन्तं विजितात्मावधेरपि ।
सौशील्यगुणगुल्मत्वात् सन्धिस्स्याद् विभवार्चयोः ॥
महाभूतात्च कनकैः हार्दश्शब्दातिगावधि ।
अनादिस्तु परष्षष्ट्या सर्वप्रहरणायुधम् ॥

(10) षाड्गुण्यागमसम्भवम्।

परो व्यूहश्च विभवो ह्यन्तर्यामी पुनः परः।
इति षड्विधपर्यायैर्भक्त्या विष्णोर्नामसहस्रकम्॥
चतुर्मूर्तिं चतुर्बाहुं चतुर्व्यूहं चतुर्गतिम्।
लभ्यमेकं चतुरात्मानं चतुर्भावं चतुर्भुजम्॥
चतुर्विधानां जीवानां अपवर्गं चतुर्विधम्।
वर्गं वा क्षेमलाभाभ्यां षाड्गुण्यागमसारवत्॥
अथैवं षट्पदं मन्त्रं प्राधान्येन परिग्रहात्।
नियुञ्जत्तदिदं स्तोत्रं तस्य स्यादुपबृंहणम्॥
षडङ्गयोगसंफुल्लं न्यासं ब्रह्म परात्परम्।
षट्पदध्वनितैर्लोकैः षट्पदैरिव सेव्यताम्।

एकं पूर्णं त्रिविधं ब्रह्म लक्ष्यं
विष्णोर्नाम्नां दशशत्याममुष्याम्।
मौलो वेदस्सर्वथैवास्य मानं
यत्तत् सांख्यैर्योगिभिश्चापि गम्यम्।
यल्लोकानां त्रिविधं कारणं सत्
यल्लोकानां सर्वलोकप्रदं च।
यल्लोकानां लोकनाच्छ्लोकमेकः
वन्दे विष्णुं ब्रह्म नित्यं कलेशम्।

स्याशीतिशत संस्थानविमर्शादस्ति वार्तिकम्।
सहस्रनामपाठानुबन्धानां लघुबोधकम्॥

रामाख्यसज्जनमनः प्रतिबिम्बशकैः
विष्णोरयं किल कृतः परिचोदनायाः।
नाम्नां सहस्रमिह सत्पठितं प्रकामं
निर्विघ्नमेवमिति वार्तिकसत्प्रबन्धः॥

सहस्रनामतत्त्वम्

निगमनम्

इत्यैतैर्दशभिर्विज्ञोः
अवतारैरिवाञ्चितम्
सहस्रनामतत्त्वार्थं
श्रीरामशर्मा निर्ममे

इतिनामभिरुक्तार्थसंख्यानैरखिलैरिह।

~~(क) इत्येतैर्दशभिर्विष्णोस्तनारैरिव स्थितम्~~

विष्णुर्नामसहस्रांशैः प्राप्यं च प्रापकं परः।

१	परः	१	ततः	२२३	= २२३ (२२३)
२	व्यूहः	२२४	"	२८८	= ६५ (६५)
३	विभवः	२८९	"	९४०	= ७५२ (६२४)
४	अर्चा	६३४	"	६६०	= —— (२७)
५	अन्तर्यामी	८२२	"	९२२	= —— (२०१)
६	परः	९४१	"	२०००	= ६० (६०)
६					२०००-२०००

~~निगमनम्~~

~~इत्येतैर्दशभिर्विष्णोस्तनारैरिव स्थितम्।~~

~~एकं पूर्णं त्रिविधं ब्रह्म लक्ष्यं~~

~~विष्णोर्नाम्नां दशशत्यामनुस्यात्।~~

~~मौलो वेदस्सर्वथैवास्य मानं~~

~~अत्र सांख्ययोगशास्त्रापि गम्यम्।~~

श्रीमते रामानुजाय नमः

प्रतिवादिभयङ्कराचार्यगुरवे नमः ॥

श्रीमतो यदुशैलविद्वद्भिजातस्य
भाष्यविवेचनवार्तिकसारं अनुभूय बोभवीति
महानन्दसन्दोहः । यदभाणि भवता :-
"पञ्चमुनि समादृतः पञ्चसिद्धान्तविनिर्णयः"
इति । पठितं श्रुत्वैव तत् स्मारं स्मारं गद्गद-
गलदेवाब्यानन्दतुन्दिलैः अस्माभिः
वेदोक्ताः आशिषः भवति प्रयुज्यन्ते ।

प्र. भ. अ.

4 २६०

श्री महालक्ष्म्याः

२०८ नामस्तोत्रम्

श्रीनारद उवाच

अत्र:- महालक्ष्म्यष्टोत्तरशतनामस्तोत्रस्य पुराणान्तरगतं पाठमपहाय पञ्चसिद्धान्तनिष्ठानुसारेण साम्प्रदायिकः पाञ्चरात्रान्तर्गत एव पाठः प्रकटीक्रियते। तस्मात् पुराण पाठ-चर्चायाः अत्र ~~[illegible]~~काशः।

अभीष्टफलप्रदाम्

अभीष्टं हि फलं। तदेव व्रियत इति वरम्। स्पष्टास्पष्ट न्यायेन वरशब्दादपि फलशब्द एव उचितः।

हरि-हर-ब्रह्मादिभिः

अत्र हरिः = इन्द्रः, अन्यत्र च ब्रह्मेन्द्रगंगाधरा-मिति लक्ष्य दर्शनात्।

पंकजशंखमुख्यनिधिभिः

शंखपद्म पाठः पंकजपद्मपौनरुक्त्यात् बहुवचन विरोधाच्च नोचितः।

युक्तां सदा ~~[illegible]~~क्ष्मीभिः

निधिशास्त्रे शंखादीनां लक्ष्मीमहत्वेनैव दर्शनात् शक्तित्वाभावात् ~~[illegible]~~ शक्तिभिरिति पाठो नोचित एव। एवं नित्यं सदेति पाठः पुनरुक्तिहतः।

लक्ष्मि प्रसीद

अगस्त्यस्य महालक्ष्म्यष्टकस्तवे पद्यमिदम्।

[illegible] अत्र देवीति पाठः न मूलकोशेषु दृष्टः।

गन्धमाल्य शुभ्रे

गन्धमाल्यं शुभे

शोभे इति पाठस्तु शोफ पर्यायस्मारणात्
जुगुप्सावहः।

त्रिभुवनतापहरे

भूतिकरीति पाठः परुषार्थकः भस्मरूपासभ्या
र्थस्मारकश्च रौद्रत्वात् त्याज्य एव।

कामां क्षीरोदसम्भवाम्

कामामिति तु काम प्रकरणात् साधुः। क्षमामिति
श्रीरुद्रसेत्रीयपाठस्तु प्रकरणानुचितः। कमाक्षीमिति
पाठस्तु पौराणिकः क्रोधसंभवशब्देनसह प्रकरणस्य
अतिविरुद्ध एव।

मंगलां देवीम्

अत्र देवी मंगलत्वेन विशेष्यते सविशेषणमिद
मेकं नामेति सम्प्रदायैकवेद्यम्।

वनदुर्गाम्

आगमेषु अस्या रूपं पठितमक्मानन्यम्। नव
दुर्गेति पाठः पौराणिकः अत्र नोचितः।

ब्रह्मविष्णुशिवात्मिकाम्

अत्र विष्णुः द्वादशादित्येष्वेकः अग्निविशे
षो वा।

नाम मंत्रविभागः

अस्मिन् स्तोत्रे सप्तवासरैः चतुर्विधैः
पुरुषार्थैः सृष्टि- स्थितिलयैश्च उपाधिभिः
नाम्नां विभागोऽर्थनिरूपणञ्च सम्प्रदायाधिवेद्यम्।

महालक्ष्म्याः

२०८ नामावलिः

यथा :—

शुक्रनासरस्य	[illegible] ९	२ - ९	९
शनि	[illegible] ९	२० - २८	२०९
भानु	[illegible]	२९ - ३६	२८
सोम	[illegible]	३७ - ६२	२६
मंगल		६३ - ८९	२७
बुध		९० - २०१	१२
गुरु		२०२ - २०८	७
			२०८

धर्मस्य	[illegible]	२ - २८	२८१
अर्थस्य	[illegible]	२९ - ९६	२८१
कामस्य	[illegible]	९७ - २००	६८१
मोक्षस्य	[illegible]	२०१ - २०८	८१
			२०८ श्री

[illegible]

सृष्टेः	~~[illegible]~~ ९	२ - ३६	३६१
स्थितेः	([illegible]) २	३७ - ९२	५६॥
लयस्य	[illegible] ७	९३ - २०८	२६१
	18=9		२०८

आगमं मन्त्रसिद्धान्तं जानात्यास्सज्जना इहै।
सहस्रनामभाष्याणां वार्तिकं जानते, ज्जना।

शुक्रः	१-९	=	९
शनिः	१०-१८	=	९
भानुः	१९-३६	=	१८
सोमः	३७-६१	=	२५
मङ्गलः	६२-८९	=	२८
बुधः	९०-१००	=	२२
गुरुः	१०१-१०८	=	८
			१०८

—— ० ——

धर्मः	१-२८	=	२८
अर्थः	२९-३६	=	२८
कामः	३७-१००	=	६४
मोक्षः	१०१-१०८	=	८
			१०८

—— ० ——

सृष्टिः	१-३६	=	३६
स्थितिः	३७-९२	=	५६
लयः	९३-१०८	=	१६
			१०८

—— ७ ——

~~श्रीगणं मन्त्रसिद्धान्तं आनानास्सभनां ॥~~
~~सहस्रनामभाष्याणि कार्तिके जानीते ७ अस्य ॥~~

—— ६ ——

श्रीमहालक्ष्म्याः
अष्टोत्तरशतनामावलिः

१ ओं प्रकृत्यै नमः
विकृत्यै
विद्यायै
सर्वभूतहितायै
परायै
वाचे
विभूत्यै
सुरभ्यै
प्रणवात्मिकायै
१ श्री श्रद्धायै २०
पद्मालयायै
पद्मायै
शुचये
स्वाहायै
सुधायै
स्वधायै
धर्मनिलयायै

ओं करुणायै नमः

18-2-07 लोकमात्रे

पद्मप्रियायै 20

पद्महस्तायै

पद्माक्ष्यै

पद्मसुन्दर्यै

पद्मोद्भवायै

पद्ममुख्यै

पद्मनाभप्रियायै

रमायै

पद्ममालाधरायै

देव्यै

पद्मिन्यै 30

पद्मगन्धिन्यै

पुण्यगन्धायै

सुप्रसन्नायै

प्रसादसुमुख्यै

प्रभायै

ओं

कमलायै

कान्तायै नमः

कामायै

क्षीरोदसंभवायै

अनुग्रहपरायै ४०

ऋद्धै

अनघायै

हरिवल्लभायै

अशोकायै

अमृतायै

दीप्तायै

निशोकायै

शोकनाशिन्यै

चन्द्रवदनायै

चन्द्रायै ५०

चन्द्रसहोदर्यै

चतुर्भुजायै

ओं चन्द्ररूपायै नमः
इन्दिरायै
इन्दुशीतलायै
आह्लादजनन्यै
तुष्ट्यै
शिवायै
शिवकरायै
सत्यै विमलायै → ६०
28 [illegible] विश्वजनन्यै
पुष्ट्यै
दारिद्र्यनाशिन्यै
प्रीत्यै
पुष्करिण्यै
शान्तायै
शुक्लमाल्याँबरायै
श्रियै
भास्कर्यै ७०
बिल्वनिलयायै

ओँ वरारोहायै नमः
यशस्विन्यै
* वसुन्धरायै
उदाराङ्गायै
हरिण्यै
हेममालिन्यै
धनधान्यकर्यै
सिद्धै
सीतायै 80
सौम्यवरप्रदायै
नृपवेश्मगतानन्दायै
वीरलक्ष्म्यै
शुभप्रदायै
शुभ्रायै
हिरण्यप्राकारायै
समुद्रतनयायै
जयायै
मङ्गलायै देव्यै

ओं विष्णुवक्षस्स्थलस्थितायै नमः १० 11
विष्णुपत्न्यै
प्रसन्नाक्ष्यै
नारायणसमाश्रितायै
दारिद्र्यध्वंसिन्यै
देव्यै
सर्वोपद्रवहारिण्यै
वनदुर्गायै
महाकाल्यै
ब्रह्मविष्णुशिवात्मिकायै
त्रिकालज्ञानसम्पन्नायै २००
परमात्मिकायै
वागीश्वर्यै
वरापाङ्गायै
देवक्यै
देवमात्रे
सिद्धलक्ष्म्यै
महाविद्यायै
ओं भुवनेश्वर्यै नमः २०८

प्रयुञ्जते इति प.पू.श्री

श्रीमतो यदुशैलविहरे

भिजातस्य भाग्य,

निर्वचनवार्तिक सारं

अनुभूय श्रीमवीति

महानन्द सन्दोहे॰

यद भाति भवता

पञ्चमुनिसमाहृत:॰

पञ्चासिद्धान्तनिका/

निर्णय इति श्रुत्वैव

तत्र स्मारं स्मारं रात्रिद्व

शैले श्रीमानन्दतुन्दिलो॰

8

annual

19

KIRLOSKAR TR